॥। চন্দ্রশেখরাষ্টকম্॥

চন্দ্রশেখর চন্দ্রশেখর চন্দ্রশেখর পাহিমাম্ ।
চন্দ্রশেখর চন্দ্রশেখর চন্দ্রশেখর রক্ষমাম্ ॥ ১॥

রত্নসানুশরাসনং রজতাদিশৃঙ্গনিকেতনং
সিঞ্জিনীকৃতপন্নগেশ্ৱরমচ্যুতাননসাযকম্ ।
ক্ষিপ্রদঘপুরত্রযং ত্রিদিৱালযৈভিৱন্দিতং
চন্দ্রশেখরমাশ্রযে মম কিং করিষ্যতি ৱৈ যমঃ ॥ ২॥

পঞ্চপাদপপুষ্পগন্ধপদাম্বুজদ্ৱযশোভিতং
ভাললোচনজাতপাৱকদগ্ধমন্মথৱিগ্রহ.ম ।
ভস্মদিগ্ধকলেৱরং ভৱনাশনং ভৱমৱযযং
চন্দ্রশেখর চন্দ্রশেখর চন্দ্রশেখর রক্ষমাম্ ॥ ৩॥

মত্তৱারণমুখ্যচরমকৃতোত্তরীমনোহরং
পঙকজাসনপদ্মলোচনপুজিতাঙ্ঘ্রিসরোরুহম্ ।
দেৱসিন্ধুতরঙ্গসীকর সিক্তশুভ্রজটাধরং
চন্দ্রশেখর চন্দ্রশেখর চন্দ্রশেখর রক্ষমাম্ ॥ ৪॥

যক্ষরাজসখং ভগাক্ষহরং ভুজঙ্গৱিভুষণং
শৈলরাজসুতা পরিষ্কৃত চারুৱামকলেৱরম্ ।
ক্ষেৱডনীলগলং পরশ্ৱধধারিণং মৃগধারিণং
চন্দ্রশেখর চন্দ্রশেখর চন্দ্রশেখর রক্ষমাম্ ॥ ৫॥

কুণ্ডলীকৃতকুণ্ডলেশ্ৱরকুণ্ডলং ৱৃষৱাহনং
নারদাদিমুনীশ্ৱরস্তুতৱৈভৱং ভুৱনেশ্ৱরম্ ।
অন্ধকান্ধকামা শ্রিতা মরপাদপং শমনান্তকং
চন্দ্রশেখর চন্দ্রশেখর চন্দ্রশেখর রক্ষমাম্ ॥ ৬॥

ভষজং ভৱরোগিণামখিলাপদামপহারিণং
দক্ষযজ্ঞৱিৱনাশনং ত্রিগুণাত্মকং ত্রিৱিলোচনম্ ।
ভুক্তিমুক্তফলপ্রদং সকলাঘসঙ্ঘনিৱরহনং

চন্দ্রশেখর চন্দ্রশেখর চন্দ্রশেখর রক্ষমাম্ ॥ ৭॥
ভক্ত ৱৎসলমচিঞতং নিধিমক্ষযং হরিদম্বরং
সরৱভূতপতিং পরাত্পর প্রমেযমনুত্তমম্ ।
সোমৱারিজ ভূহুতাশনসোমপানিলখাকৃতিং
চন্দ্রশেখর চন্দ্রশেখর চন্দ্রশেখর রক্ষমাম্ ॥ ৮॥
ৱিশ্ৱসৃষ্টিৱিধালিনং পুনরেৱ পালনতত্পরং
সংহরন্তমপি প্রপঞ্চম শেষলোকনিৱাসিনম্ ।
ক্রিডযন্তমহরিনশং গণনাথযুথ সমন্ৱিতং
চন্দ্রশেখর চন্দ্রশেকর চন্দ্রশেকর রক্ষমাম্ ॥ ৯॥
মৃত্যুভীতমৃকণ্ডসূনুকৃতস্তৱ শিৱ সন্নিধৌ
যত্র কুত্র চ পঠেন্নহি তস্য মৃত্যুভযং ভৱেৎ ।
পুরণমাযুররোগিতামখিলাথ সম্পদমাদরং
চন্দ্রশেখর এৱ তস্য দদাতি মুক্তিমযত্নতঃ ॥ ১০॥
॥ ইতি চন্দ্রশেখরাষ্টকম্॥